श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री वेङ्कटाचार्यस्य कृतिषु

# ॥ श्रीमद्वेदान्तदेशिक अष्टोत्तरशतनामस्तोत्रम् ॥

*This document*[*] *has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक अष्टोत्तरशतनामस्तोत्रम् ॥

घण्टावतारोऽनन्तार्य तनयो वेङ्कटाधिपः।
श्रीमल्लक्ष्मणयोग्यंशो वरदाचार्य वीक्षितः॥ १ ॥

रामानुजार्यसंदृष्टः सौपर्ण मनुचिन्तकः।
तार्क्ष्य दत्तवरश्शुद्धः प्रसादितहयाननः॥ २ ॥

अधीतसाङ्ग सकलश्रुतिस्स्मृतिविदग्रणीः।
इतिहासपुराणज्ञः सुकविस्तर्कतत्त्ववित्॥ ३ ॥

भाष्यकारो भयहरः सुधाशीदुग्धराशिकृत्।
प्रधानप्रतितन्त्रज्ञो देवतापारमार्थ्यवित्॥ ४ ॥

श्रुतविद्यश्श्रावयिता श्रुतपालश्श्रुतप्रदः।
श्रितः पाण्डित्यदाता च कृतकृत्यः कृती सुधीः॥ ५ ॥

निरस्तसाङ्ख्यः प्रत्युक्तयोगः काणादभञ्जनः।
अचिच्चैतन्यवादघ्नः क्षणिकाणुमतार्दनः॥ ६ ॥

साकारधीनिराकर्ता शून्यवादतमोनुदः।
कुदृष्ट्युरगपक्षीशः सप्तभङ्गी विलोपनः॥ ७ ॥

भेदाभेदमतच्छेत्ता धूतयादवकल्पनः।
अनीशवाददम्भोळिः पाषण्डमतखण्डनः॥ ८ ॥

संरक्षितागमश्शङ्खचक्रधारणरक्षिता।
ऊर्ध्वपुण्ड्राङ्कनत्राता शुद्धसत्त्वमयाकृतिः॥ ९ ॥

यत्याचारप्रतिष्ठाता सर्वतन्त्रस्वतन्त्रधीः।
अवतार रहस्यज्ञस्त्वर्चासौन्दर्य सक्तधीः॥ १० ॥

www.prapatti.com

अर्थपञ्चक तत्त्वज्ञः तत्त्वत्रयविशेषवित्।
भक्तियोग विरोधिघ्नो भक्तिमान् भगवत्प्रियः॥ ११ ॥

ज्ञानैकसारो द्वयवित् विभक्ताधिकृतित्रयः।
चतुश्श्लोक्यर्थ सारज्ञः सम्यग्ज्ञाताङ्गपञ्चकः॥ १२ ॥

षडङ्गयोग निर्णेता सप्ततन्तुकृदुत्तमः।
अष्टाक्षरैकनिरतो नवमैकरसाश्रयः॥ १३ ॥

दशतात्पर्यविज्ञाता शतकृच्च सहस्रवित्।
स्थूललक्षोऽनेकनानाकोटिज्ञान निवर्तकः॥ १४ ॥

धर्मशङ्कुः साधुबृन्दवन्दिताङ्घ्रिसरोरुहः।
पद्माक्षानन्दजनकस्तथाऽनन्तगुणाकरः॥ १५ ॥

त्यागशब्दार्थवित् धर्मवेदी विधिविशेषवित्।
उत्तमश्लोकभावज्ञः पञ्चकालपरायणः॥ १६ ॥

सुरसेव्यः पूर्णमनाः सुरीन्द्रप्रतिरूपकः।
कवितार्किकपञ्चास्यो निगमाञ्चलदेशिकः॥ १७ ॥

वैद्यो मुनीन्द्रः सर्वज्ञ उपकर्ता तथैव च।
सत्संप्रदायस्थिरधीरनघः सत्यवागपि॥ १८ ॥

साधुवृत्तिर्मुक्तडम्भो जिताक्षो दीर्घबन्धुमान्।
दयालुश्शासिता सर्व हिताचरणतत्परः॥ १९ ॥

महागुरुः स्वर्णवर्णः सुबाहुः पुण्डरीकदृक्।
पवित्रपाणिर्व्याख्यान मुद्राङ्कितकराम्बुजः॥ २० ॥

सव्यपाणितलन्यस्त दिव्यपुस्तकभूषणः।
परशीर्षन्यस्त वामपादाब्ज कटकोज्ज्वलः॥ २१ ॥

इतीदं देशिकेन्द्रस्य नाम्नामष्टोत्तरं शतम्।
सङ्कीर्तयेदनुदिनं सर्वपापापनुत्तये॥ २२ ॥



www.prapatti.com

पठन्नामशतं भक्त्या श्रुत्वा गुरुमुखाम्बुजात्।
प्रसादाद्देशिकेन्द्रस्य भुक्तिमुक्ती समश्नुते॥ २३ ॥

एकैकमपि तन्नाम कीर्तयन् सकृदुत्तमम्।
सर्वान् कामानवाप्नोति किमुताष्टोत्तरं शतम्॥ २४ ॥

॥ इति श्रीमद्वेदान्तदेशिक अष्टोत्तरशतनामस्तोत्रं संपूर्णम्॥

www.prapatti.com